# Shri Sharadesha TrishatI Stotram

# શ્રીશારદેશત્રિશતીસ્તોત્રમ્

## Document Information

Text title : shAradeshatrishatI

File name : shAradeshatrishatI.itx

Category : trishatI, ganesha, shatI

Location : doc_ganesha

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : See corresponding nAmAvalI

Source : Vinayakatantra

Latest update : May 10, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 10, 2021

*sanskritdocuments.org*

Shri Sharadesha TrishatI Stotram

# શ્રીશારદેશત્રિશતીસ્તોત્રમ્

શ્રીદેવ્યુવાચ -
ત્રિશતીં શારદેશસ્ય કૃપયા વદ શઙ્કર ।
શ્રીશિવ ઉવાચ -
સહસ્રનામ મન્ત્રવદ્ ઋષિધ્યાનાધિકં સ્મૃતમ્ ॥ ૧॥

॥ અથ શ્રીશારદેશત્રિશતી ॥

ૐકારવાચ્ય ૐકાર ૐકારમુખરાજિતઃ ।
ૐકારમાતૃગો ૐકારશૂન્યપદસંસ્થિતઃ ॥ ૨॥

ૐકારબિન્દુગો નિત્યં ૐકારનાદકારણમ્ ।
ૐકારમાત્રાજનકઃ ૐકારપૂર્ણવિગ્રહઃ ॥ ૩॥

ૐકારચક્રમધ્યસ્થ ૐકારશક્તિનાયકઃ ।
શ્રીંકારશ્શ્રીધરશ્શ્રીદઃ શ્રીપતિશ્શ્રીનિકેતનઃ ॥ ૪॥

શ્રીનિવાસશ્શ્રીધરશ્શ્રીમાન્ શ્રીંકારદેવપૂજિતઃ ।
શ્રીંકારદેવપૂર્વાઙ્ગઃ શ્રીંકારયુગ્મસેવિતઃ ॥ ૫॥

હ્રીંકારલક્ષ્યઃ હ્રીંકારશક્તીશઃ હ્રીંમનુપ્રિયઃ ।
હ્રીંકારમાયાજનકો હ્રીંકારશક્તિપૂજિતઃ ॥ ૬॥

હ્રીંકારેશદક્ષિણાઙ્ગો હ્રીંકારમનુતોષિતઃ ।
હ્રીંકારજપસુપ્રીતો હ્રીંકારશક્તિલોકગઃ ॥ ૭॥

હ્રીંકારશક્તિમલજો હ્રીંકારશક્તિનન્દનઃ ।
ક્લીંકારમનુસંવેદ્યઃ ક્લીંકારમનુતોષિતઃ ॥ ૮॥

ક્લીંકારેશપશ્ચિમાઙ્ગઃ ક્લીંકારદેવસેવિતઃ ।
ક્લીંકારેણ વિશ્વમોહકરઃ ક્લીંકારકારણમ્ ॥ ૯॥

ક્લીંકારેણ વશ્યદાતા ક્લીંકારેશ્વરપૂજિતઃ ।

ક્લીંકારશક્તિપતિદઃ ક્લીંકારશક્તિહર્ષદઃ ॥ ૧૦॥

ક્લીંકારેણ વિશ્વસ્રષ્ટા ક્લીંકારમયવિશ્વગઃ ।
ક્લીંકારેણ વિશ્વવૃદ્ધિકરઃ ઐઙ્કારપીઠગઃ ॥ ૧૧॥

ઐઙ્કારજપસુપ્રીત ઐઙ્કારદેવવન્દિતઃ ।
ઐઙ્કારેશ્વરવામાઙ્ગઃ ઐઙ્કારશક્તિનાયકઃ ॥ ૧૨॥

ઐઙ્કારશક્તિજનક ઐઙ્કારેણ વિભૂતિદઃ ।
ઐઙ્કારમયવેદેડ્ય ઐઙ્કારશબ્દકારણમ્ ॥ ૧૩॥

ગમ્બીજો ગમ્બીજદેહો ગમ્બીજાત્મા ગંસ્થિતિપ્રદઃ ।
ગઙ્કારમન્ત્રસંવેદ્યો ગઙ્કારેણ ગતિપ્રદઃ ॥ ૧૪॥

ગઙ્કારેણ વિશ્વસ્રષ્ટા ગઙ્કારેણ સુમુક્તિદઃ ।
ગઙ્કારેણ કામદાતા ગઙ્કારેણાઽર્થદાયકઃ ॥ ૧૫॥

ગઙ્કારેણ બ્રહ્મભૂયદાયકો ગણનાયકઃ ।
ગણેશ્વરો ગણક્રીડો ગણનાથો ગણાધિપઃ ॥ ૧૬॥

ગણમૂર્તિર્ગણપતિર્ગણત્રાતા ગણઞ્જયઃ ।
ગણજ્યેષ્ઠો ગણશ્રેષ્ઠો ગણગોપ્તા ગણપ્રથઃ ॥ ૧૭॥

નરદેહો નાગમુખો નારાયણસમર્ચિતઃ ।
નારાયણશ્રીપૂર્વાઙ્ગો નાદમધ્યે પ્રતિષ્ઠિતઃ ॥ ૧૮॥

નન્દ્યો નન્દીપ્રિયો નાદજનકો નટનપ્રિયઃ ।
નગરાજસુતાસૂનુર્નટરાજસુપૂજિતઃ ॥ ૧૯॥

પરમાત્મા પરન્ધામ પશુપાશવિમોચકઃ ।
પરઞ્જ્યોતિઃ પરાકાશઃ પુરાણપુરુષોત્તમઃ ॥ ૨૦॥

પુરુષઃ પ્રણવાકારઃ પુરુષાતીતવિગ્રહઃ ।
પદ્મનાભસુતાનાથઃ પદ્મનાભસમર્ચિતઃ ॥ ૨૧॥

તત્ત્વાનામ્પરમન્તત્ત્વં તત્ત્વમ્પદનિરૂપિતઃ ।
તત્ત્વાતીતસ્તત્ત્વમયસ્તત્ત્વાષ્ટકસુસંસ્થિતઃ ॥ ૨૨॥

તત્ત્વમસ્યાકૃતિધરસ્તત્ત્વમસ્યાર્થબોધકઃ ।
તારકાન્તરસંસ્થાનસ્તારકસ્તારકાનનઃ ॥ ૨૩॥

તારકાસુરસંહર્તા તારકાન્તકપૂર્વજઃ ।
યજ્ઞો યજ્ઞપતિર્યજ્ઞફલદો યજ્ઞરક્ષકઃ ॥ ૨૪॥

યજ્ઞમૂર્તિર્યજ્ઞભોક્તા યજ્ઞેશાનવરપ્રદઃ ।
યજ્ઞકર્તા યજ્ઞધર્તા યજ્ઞહર્તા યમીશ્વરઃ ॥ ૨૫॥

વિનાયકો વિઘ્નરાજો વૈનાયકપ્રવાલકઃ ।
વિઘ્નહર્તા વિઘ્નકર્તા વિશ્વાધારો વિરાટ્પતિઃ ॥ ૨૬॥

વાગીશ્વરીપતિર્વાણીનાયકો વામનાર્ચિતઃ ।
રક્ષાકરો રાક્ષસઘ્નો રમેશો રાવણાર્ચિતઃ ॥ ૨૭॥

રમાપ્રિયો રમેશાનપૂજિતો રાધિકાર્ચિતઃ ।
રમારમેશપૂર્વાઙ્ગો રાકાચન્દ્રસમપ્રભઃ ॥ ૨૮॥

રત્નગર્ભો રત્નદાતા રક્તો રાજ્યસુખપ્રદઃ ।
વિશ્વનાથો વિરાણ્ણાથો વિશ્વો વિષ્ણુપ્રપૂજિતઃ ॥ ૨૯॥

વિશ્વાતીતો વિશ્વમયો વીતિહોત્રસમર્ચિતઃ ।
વિશ્વમ્ભરો વિશ્વપાતા વિશ્વધર્તા વિમાનગઃ ॥ ૩૦॥

રામાર્ચિતાઙ્ઘ્રિયુગલો રઘુનાથવરપ્રદઃ ।
રામપ્રિયો રામનાથો રામવંશપ્રપાલકઃ ॥ ૩૧॥

રામેશ્વરક્ષેત્રવાસી રામસેતુફલપ્રદઃ ।
રામભક્તિસુસન્તુષ્ટો રામાભીષ્ટફલપ્રદઃ ॥ ૩૨॥

રામવિઘ્નપ્રશમનો રામાય સિદ્ધિદાયકઃ ।
દક્ષયજ્ઞપ્રમથનો દૈત્યવારણધારણઃ ॥ ૩૩॥

દ્વૈમાતુરો દ્વિવદનો દ્વન્દ્વાતીતો દ્વયાતિગઃ ।
દ્વિપાસ્યો દેવદેવેશો દેવેન્દ્રપરિપૂજિતઃ ॥ ૩૪॥

દહરાકાશમધ્યસ્થો દેવદાનવમોહનઃ ।
વામારામો વેદવેદ્યો વૈદ્યનાથો વરેણ્યજઃ ॥ ૩૫॥

વાસુદેવસમારાધ્યો વાસુદેવેષ્ટદાયકઃ ।
વિભાવસુમણ્ડલસ્થો વિભાવસુવરપ્રદઃ ॥ ૩૬॥

વસુધારેશવરદો વરો વસુમતીશ્વરઃ ।
દયાવાન્ દિવ્યવિભવો દણ્ડભૃદ્ દણ્ડનાયકઃ ॥ ૩૭॥

દાડિમીકુસુમપ્રખ્યો દાડિમીફલભક્ષકઃ ।
દિતિજારિર્દિવોદાસવરદો દિવ્યલોકગઃ ॥ ૩૮॥

દશબાહુર્દીનદૈન્યમોચકો દીનનાયકઃ ।
પ્રમાણપ્રત્યયાતીતઃ પરમેશઃ પુરાણકૃત્ ॥ ૩૯॥

પદ્મપતિઃ પદ્મહસ્તઃ પન્નગાશનવાહનઃ ।
પન્નગેશઃ પન્નગજઃ પન્નગાભરણોજ્જ્વલઃ ॥ ૪૦॥

પાર્વતીતનયઃ પાર્વતીનાથપ્રપૂજિતઃ ।
જ્ઞાનં જ્ઞાનાત્મકો જ્ઞેયો જ્ઞાનદો જ્ઞાનવિગ્રહઃ ॥ ૪૧॥

જ્ઞાનામ્બાતનયો જ્ઞાનશક્તીશો જ્ઞાનશાસ્ત્રકૃત્ ।
જ્ઞાનકર્તા જ્ઞાનભર્તા જ્ઞાની જ્ઞાનસુરક્ષકઃ ॥ ૪૨॥

ધર્મો ધર્મપ્રદો ધર્મરાજો ધર્મપ્રપૂજિતઃ ।
ધર્મવાહો ધર્મબાહુર્ધર્મોષ્ઠો ધર્મપાલકઃ ॥ ૪૩॥

ધર્મકર્તા ધર્મધર્તા ધર્મભર્તા ધનપ્રદઃ ।
યશસ્કરો યોગગમ્યો યોગમાર્ગપ્રકાશકઃ ॥ ૪૪॥

યોગદો યોગિનીનાથો યોગશાન્તિપ્રદાયકઃ ।
યોગકર્તા યોગધર્તા યોગભૂમિપ્રપાલકઃ ॥ ૪૫॥

યોગવિઘ્નપ્રશમનો યોગસિદ્ધિપ્રદાયકઃ ।
મેધાપ્રદો માયિકેશો મેધેશો મુક્તિદાયકઃ ॥ ૪૬॥

માયી માધવસમ્પૂજ્યો માધવો માધવાત્મજઃ ।
મન્દાકિનીતીરવાસી મણિકર્ણિગણેશ્વરઃ ॥ ૪૭॥

ધનદો ધાન્યદો ધીરો ધૈર્યદો ધરણીધરઃ ।
ધર્મપુત્રધર્મતુષ્ટો ધર્મપુત્રેપ્સિતપ્રદઃ ॥ ૪૮॥

ધર્મપુત્રધર્મદાતા ધર્મપુત્રાર્થદાયકઃ ।
ધર્મવ્યાધજ્ઞાનદાતા ધર્મવ્યાધેપ્સિતપ્રદઃ ॥ ૪૯॥

દત્તપ્રિયો દાનપરો દત્તાત્રેયેષ્ટદાયકઃ ।
દત્તાત્રેયયોગદાતા દત્તાત્રેયહૃદિસ્થિતઃ ॥ ૫૦॥

દાક્ષાયણીસુતો દક્ષવરદો દક્ષમુક્તિદઃ ।

દક્ષરાજરોગહરો દક્ષરાજેપ્સિતપ્રદઃ ॥ ૫૧॥

હંસો હસ્તિપિશાચીશો હાદિવિદ્યાસુતોષિતઃ ।
હરિર્હરસુતો હૃષ્ટો હર્ષદો હવ્યકવ્યભુક્ ॥ ૫૨॥

હુતપ્રિયો હરીશાનો હરીશવિધિસેવિતઃ ।
સ્વસ્સ્વાનન્દસ્સ્વસંવેદ્યો સ્વાનન્દેશસ્સ્વયમ્પ્રભુઃ ॥ ૫૩॥

સ્વયઞ્જ્યોતિઃ સ્વરાટ્પૂજ્યસ્સ્વસ્વાનન્દપ્રદાયકઃ ।
સ્વાત્મારામવરસ્સ્વર્ગસ્વાનન્દેશસ્સ્વધાપ્રિયઃ ॥ ૫૪॥

સ્વસંવેદ્યો યોગગમ્યસ્સ્વસમ્વેદ્યત્વદાયકઃ ।
હય્યઙ્ગવીનહૃદયો હિમાચલનિવાસકૃત્ ॥ ૫૫॥

હૈમવતીશતનયો હેમાઙ્ગદવિભૂષણઃ ।
ફલશ્રુતિઃ -
શારદેશમન્ત્રભૂતાં ત્રિશતીં યઃ પઠેન્નરઃ ॥ ૫૬॥

ઇહ ભુક્ત્વાઽખિલાન્ભોગાન્ શારદેશપ્રસાદતઃ ।
વિદ્યાં બુદ્ધિં ધિયં કીર્તિં લબ્ધ્વા મોક્ષમવાપ્નુયાત્ ॥ ૫૭॥

॥ ઇતિ વૈનાયકતન્ત્રે શારદેશત્રિશતીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*Shri Sharadesha TrishatI Stotram*
pdf was typeset on May 10, 2021

Please send corrections to *sanskrit@cheerful.com*